X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.

Coll. No. *10

Title BHAGAVANTA-BHASKARA.
('SUDDHI-MAYUKHA)

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 10 Subject : Dharma Śāstra

Title : Shuddhi Mayukha in Bhagavant Bhāskara

Author : Nilakantha Bhatt Scribe : —

Date of the work : c. 1640 A.D Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 11" by 5½" Extent : 27

Language : Sanskrit. Script : Devanāgarī

Remarks : Complete.

याज्ञवल्क्यः।२

॥ ॥श्रीगणेशाय नमः॥ ॥ यो लीलया संतनुते त्र विश्वं तत्पालयत्यात्मनि विश्वरूपे। लयं नयत्याशु च पूर्णरूपः शिवं ततनोत्वाशुर
विर्ममासे॥१॥ श्रुतीः स्मृतीर्वीक्ष्य पुराणजातं तंत्रविधानपि संनिबंधान्। श्री शंकरस्यात्मजनीलकंठो द्रव्यादिशुद्धिं विवृणोति
सर्वां॥२॥ प्रतारकैरादृतमत्र किंचिन्मया तु निर्मूलतया तदुज्झितं। उक्तोक्तितोमहितेनैका नित्यवसुपहीनापचितिर्नहीय
ते॥३॥ अथ द्रव्यशुद्धिः। सुवर्णरूप्यशंखाश्मशुक्तिरत्नमयानि च। कांस्यायस्ताम्ररैत्यानि त्रपुसीसमयानि च। निर्लेपानि
वशुध्यंति केवलेन जलेन तु। शूद्रोच्छिष्टानि शोध्यानि त्रिधा क्षाराम्लवारिभिः। इति। शंखः। क्रमश्च शकुनिमुखावमृष्टं निर्लि
खेत्। श्वापदमुखावमृष्टपात्रं न प्रयुंजीत निर्लेखवस्त्रहरणं। आयसं तवः। गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च। शुध्य
ति दशभिः क्षारैः श्वकाकोपहतानि च। क्षारो भस्म। एतच्च स्वल्पोपहतिविषयं। अधिके तु स्मृत्यंतरे। भस्मना शुध्यते कां
स्यं सुरया यन्न लिप्यते। सुरामूत्रपुरीषैस्तु शुध्यते तापलेखनैः। आमिषेणानुपहतिं पुनर्दहनेन शुध्यतीति बौधायनः। तैज
सानां मूत्राद्युपघाते पुनः करणं गोमूत्रे वा सप्तरात्रं परिवासनं। पुनः करणं शकृद्गोमूत्रे वासनं। अंगिराः। गंडूषं पाद
शौचं च यः कुर्यात्कांस्यभाजने। षण्मासं भुवि निःक्षिप्य पुनराकारमादिशेत्। पुनराकारः पुनःकरणं। मद्वांडो नाम
ल्यापहतो पुनः पाकान्महीमयमिति याज्ञवल्क्येन शुद्धिरुक्ता। तथा। लोहानां दहनाच्छुद्धिर्भस्मना गोमयेन वा।
।दहनोत्खननाद्वापि शैलानामंभसापि वा। काष्ठानां तक्षणाच्छुद्धिर्मृद्गोमयजलैरपि। पदिनैर्मृत्सुधेत्तदात्ताव

न्मात्रच्छेदनं दाहो वा। स्मृत्यंतरे। वस्त्रवत्यादिराशीनामेकदेशस्य दूषणे। तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हति। असंह
तं तु प्रोक्षणात्शुध्यतीति भावः। याज्ञवल्क्यः। सोषैरुदकगोमूत्रैः शुध्यत्याविककौशिकं। सश्रीफलैरंशुपट्टं सारिष्टै
ः कुतपं तथा॥ सगौरसर्षपैः क्षौममिति। अयमर्थः। ऊर्णामयमाविकं। कोशसंभवं तसरीपट्टादि कौशिकं। वल्कलतंतुनिर्मितमं
शुपट्टं। श्रीफलं बिल्वफलं। पर्वतीयछागलोमनिर्मितं कुतपः। अरिष्टफेनिलफलं। अतसीसूत्रनिर्मितं क्षौमं। एतच्चाविको
पघाते। किंचिदुपघाते तु प्रोक्षणमेव। क्षालनासहतूलिकादिविषयमिदं। क्षा[illegible]णां विशेषः। तूलिकामुपधानं च पुष्परक्तांब
रं तथा। शोषयित्वातपे किंचित्करैः संमार्जयेन्मुहुः। पश्चाच्च वारिणा प्रोक्ष्य विनियुंजीत कर्मणि। अतिमालिन्ये परिशोधयेद
पि। अहतानां प्रोक्षणमिति स्मरणाद्यंत्रमुक्तं नूतनवाससां प्रोक्षणाच्छुद्धिः। शुष्कवासा स्थले कुर्यात्तर्पणाचमनं जपमित्य
स्यापवादः। शुद्धिविवेके। अप्रक्षालाहतं वस्त्रं शुष्कं वत्प्रतिपादयेदिति। शंखः। सूतिकोच्छिष्टभांडस्य सुरामद्यहतस्य च। त्रिःस
प्तमार्जनाच्छुद्धिर्नतु कांस्यस्य तापनं। कांस्यातिरिक्ततैजसानामल्पोपघाते मार्जनं। तापनं च प्रतिमार्जनमुदकक्षालनमा
वर्तते। कांस्ये तथा न। अपितु क्षालनं मार्जनं चेत्यर्थः। अल्पधान्यादिविषये बौधायनः। व्रीहयः प्रोक्षणाद्भिः शाकमूल
फलानि च। तन्मात्रस्यापहाराद्वा निस्तुषीकरणेन वा। अनेकपुरुषोद्वार्यविषये तु पर्यग्निकरणं प्रोक्षणं वा कश्यपोक्तं। विष्णुः
अत्यर्थात्दग्धकाष्ठानां श्वभिश्चंडालवायसैः। स्पर्शने विहितं शोचं सैमस्पर्शिषु मीरितेः। तथा। प्रोक्षणेन तु पुस्तकमिति

शु॰म वित्। सिद्धान्ते मनुः। पक्षिजग्धं गवाघ्रातं अवधूतमवक्षुतं। दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति। अवधूतं पस्योपवीवासो
१ वधूतं। याज्ञवल्क्यः। सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये। पत्तु गोतमः। नित्यमभोज्यं केशकीटावपन्नमिति। तत्सह पक्षी
पिप्रायं। पराशरः। पंकद्रोणाधिकं त्वन्नं काकश्वाद्युपघातिकं। ग्रासमुद्धृत्य तन्मात्रं पन्नु लीलाकृतं भवेत्। हेमाद्रौ केनचा
मुक्तेड्डाडूलेनोचुनाप्यवा।। अग्निज्वालोपसंस्पर्शात्तु वर्णामधुसर्पिषां। विप्राणां ब्रह्मघोषेण पूतं भोज्यं तद्भवेत्। त
था। अन्नमेकाहिकं पक्वं श्वकाकाद्युपघातितं। केशकीटावपन्नं च न दृष्टेन विशुध्यति। श्रीनस्यापि विविदिष्ट एवम
नीषिभिः। इदमल्पधनविषयं ज्ञेयं। द्रवविषये शंखः। अपर्युषितं तैलानां प्लावनं गोरसस्य च। मांडनिचालयेद्द्भिः
शाकमूलफलानि च। वकारात् घृततैलयोरपि। प्लावनं वस्त्रान्तरितपात्रेऽप्रक्षेपः। तद्युक्तपात्रस्य तज्जातीपद्रव्यपूर
तथा। पूरणं यथा द्रव्यं बहिर्निःसरति तत्प्लावनमिति केचित्। तथाच आपस्तंबो येतु नयेन्यात्पात्रात्पात्रांतरं द्रवं। तथाचौ
धायनः। देशकालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं। उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्। याज्ञवल्क्यः। वाकू
तमंबुनिर्णिक्तं अज्ञातं च सदा शुचीति। अज्ञातस्पर्शविषयकसंशयनिश्चयस्य कारणज्ञानाभाववचनं। वमकोअनं क
षाय द्रव्येणाशोधनमिति केचित्। नकुलश्च भिहितस्य पर्मांसस्य शुचितं मनुरब्रवीदिति। श्वभिर्हतमृगयायां। तदपि भक्षणस्य राम
तथा। नित्यमास्यं शुचि स्त्रीणां शकुनेः फलपातने। प्रस्रवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिरिति। स्त्रीमुखं रतिसम २

येशुचि। स्त्रीमुखं रतिचुंबनादाविति पैठीनसिस्मरणात्। तथा। नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितं। ब्रह्मचारिगतं भैक्ष्यं नि
त्यं मेध्यमिति स्मृतं। कारुहस्तस्तत्कर्मणि। भैक्ष्यमन्नादीन खादिदत्तं न तु चांडालादिस्पृष्टं। तथा।। शुचिरग्नी रजो वा धूरा
पो दधि घृतं पयः। सर्वाण्येतानि मेध्यानि स्पर्शे छाया च नित्यशः। छाया चांडालादेरन्या। यथा ब्रह्मपुराणे। चांडालपतितका
या स्पर्शे दुष्टा तनुर्भवेदिति। रजो पि रासभादेरन्यत्। तथाह शातातपः। रेणवः शुचयः सर्वे वायुना ये समीरिताः। अन्य
त्र रासभाजाविष्ठाश्वकरविमार्जनी। अंतेपंचमात्र भावगृह्यादसः। तथा। पादौ शुची ब्राह्मणस्य अजाश्वानां मुखं शुचि
। गावो पृष्ठानि मेध्यानि सर्वगात्राणि योषितां। भूशुद्धिमाह याज्ञवल्क्यः।। भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा
सिंचनादुल्लेखनाल्लेपाद्गृहं मार्जनलेपनात्। देवलः। अदुष्टा संततधारा वातोद्धूताश्च रेणवः। स्त्रियो वृद्धाश्च बाला
श्च न दुष्यंति कदाचन। दधि सर्पिः पयः क्षौद्रं भांडदोषो न विद्यते। मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः। मार्जारः शुचिः
कर्मकालेदन्यत्र। तत्र तु स्पर्शे स्नानं। तथा। आसनं शय्यासनं वस्त्रं जायापत्यं कमंडलुः। शुचीन्यात्मनि एतानि परेषामशु
चीनि हि। तथा। उपस्पृश्य शुचिः स्पृष्ट्वा तृतीयं चापि मानवः। हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यति। प्रथमोशुचिस्त
त्स्पृष्टो द्वितीयः। तत्स्पृष्टस्तृतीयः। तत्स्पर्शे आचमनमात्रं।। चतुर्थादेर्न मानाभावात्। हरिहरभाष्ये हृदूपशातातप
शिशोरभ्युक्षणं कार्यं बालस्याचमनं स्मृतं। रजस्वलादिसंस्पर्शे स्नानं तस्य च कुमारकैः। बालादिस्वरूपं च तत्रैवोक्तं। प्राकृत

शु॰म॰ ३

ङाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः कुमारस्तु स विज्ञेयो यावन्मौंजीनिबंधनमिति। नदीशुद्धिमाह गार्ग्यः। अकार्यका
रिणां दानं वेगो नद्याश्च शुद्धिकृत्। शोध्यस्य मृच्च तोयं च संन्यासो वै द्विजन्मनामिति सर्वापवादं मरीचिराह। येषु स्थानेषु
यच्छौचं धर्माचारश्च तादृशः। तत्र तन्नावमन्येत धर्मस्तत्रैव तादृशः। येषु देशेषु ये देवा येषु देशेषु ये द्विजाः। येषु स्थानेषु
यत्तोयं या च मृत्तिका। तत्पावनमिति शेषः। पराशरोपि। युगे तीर्थे च ये धर्मास्तत्र तत्र च ये द्विजाः। तेषां निंदा न कर्त्त
व्या युगरूपा हि ते स्मृताः। तथा। यद्यपि स्यात्स्वयं ब्रह्मा त्रैलोक्याकर्षणक्षमः। तथापि लौकिकाचारं मनसापि न लंघये
त्॥ अथ गर्भस्रावाद्याशौचं। तत्र पाराशरः। आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः। अत ऊर्ध्वं प्रसूतिः स्यात्तद्दशाहं
सूतकं भवेदिति। स्रावाशौचमाह मरीचिः। गर्भस्रुतौ यथामासमचिरे तूत्तमे त्रयः। राजन्ये तु चतूरात्रं वैश्ये पंचाहमे
वतु। अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तितेति। अचिरे आद्यमासत्रयेण सपिंडानां। उत्तमे ब्राह्मणे। तथा चतुर्थमाते
वन्तु अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तितेति। एवं मातुः पंचमे पंचषष्ठे षडहः सपिंडानाम। पिपंचमषष्ठयोस्त्र्यहः। या ते मातुर्यथा
स्रवत्वात् इति विज्ञानेश्वरमाधवादयः। एवं मातुः पंचमे पंचषष्ठे षडहः सपिंडानां। त्रियदं दिनयद्वा होरात्रलक्षकं ज्ञेयं। एवमन्यत्रापि। एतच्च
मासं सपिंडानां दिनत्रयमिति माधवात्। अत्राशौचप्रकरणो रात्रियदं दिनयद्वा होरात्रलक्षकं ज्ञेयं। सप्तमे पूर्णे मे च प्रसवाशौचं कार्यमिति द्रष्टव्यं। स्वयत्नात् राम ३
गर्भनाशात् सूतकं सर्ववर्णेषु सर्वं सप्तममासादिषु स्वस्वजात्युक्तं संपूर्णमेव प्रसवाशौचं कार्यमिति द्रष्टव्यं। स्वयत्नाद्
यभिचारोद्भूतगर्भस्य प्रसवे पितृजनकाद्धे अशोचमयोरप्येकाहः॥ तथा चैकाहानुवृत्तौ याज्ञवल्क्यः। अनौरसेषु पुत्रेषु भार्या

स्वन्यगतासु चेति। मातुस्तु तत्राप्युक्तैव व्यवस्था। विशेषानुक्तेः स्वभार्यासु स्वयं प्रतिलोमव्यतिरिक्तमाश्रितासु प्रसूतासु मृतासु
चाहोरात्रमाशौचं। सपिंडानां तु स्नानमात्रमिति मिताक्षरायां॥ ॥इति गर्भस्रावाशौचं॥ ॥सप्तममासप्रभृति सूति वि
षये हारीतः। जातमृते मृतजाते वा सपिंडानां दशाहमाशौचमिति। जननोत्तरं नालच्छेदोत्तरमेव शिशुमरणे सपिंडा
नां दशाहं जन्माशौचं। पूर्वमरणे तु त्र्यहं वक्ष्यते। दशाहमिति तत्तद्वर्णाशौचोपलक्षणं। मनुरपि दशाहमंतरे
वालेप्रमीतेतस्य वांधवैः शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते। यस्तु जातमृते मृतजाते वा कुलस्य सद्यः
शौचमिति स्मृत्यंतरं तच्छिशुमरणनिमित्ताशौचाभावपरं मरणाशौचनिमित्तं स्नानमात्रमस्त्येवेति ग्रंथकृतः। ना
भिच्छेदात्प्राङ्मरणे मातुः संपूर्णं सूतकं सपिंडानां तु जन्मनिमित्तं त्रिरात्रं। तथा च मनुः। जीवन्जातोपदितो म
तः सूतक एव तु। सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकं। ततस्तद्दर्शनं नमेवनाभिवर्द्धनादर्वाग् इति या वत्। यद्
तः मृतक एव तु। सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकं। छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति। तन्नालच्छे
दोत्तरं शिशुमरणे सपिंडानां दशाहं जन्माशौचपरमिति केचित्। शिशुजन्मनिमित्तकदानादिविकारेष्वविलप्रति
पादनपरमिति तु युक्तं। अन्यथान्तरार्द्धमृतपदाध्याहारापत्तेरिति। जनननिमित्तमस्पृश्यत्वं मातुर्दशाहं। पितुस्तु सचे
लस्नानादस्पृश्यत्वं गच्छतीत्याह संवर्त्तः। पुत्रे जाते पिता सद्यः सचेलं स्नानमाचरेत्। स्पृश्यो भवति ततः पश्चादित्याह भ

गतान्मनुरिति। पुत्रे इति पुंस्त्वमविवक्षितमनुवादगतत्वात् तेन स्वपत्यमपि पितुः स्नानमावश्यकं। सपिंडानामस्पृश्यत्वं
नास्त्येव। अतो न तेषां स्नानमपि प्रहोगिराः। सूतके सूतिकावर्जं संस्पर्शो न निषिध्यत इति। वैधकार्ये तु षष्ठीन सि
ः। सूतिकां पुत्रवतीं विंशतिरात्रेण कर्मकारयेन्मासेन स्त्रीजननी मिति। दशाहपर्यंतमाशौचं मे वकर्मानधिका
र प्राप्तेर्जन्मप्रभृति गणानायां विंशतिरात्रमासपदयोः प्राप्तदशाहोत्तरे शेषत्वादा प्राप्त्या वशिष्टदिनाशौचविधिरिति विध्य
नुवादवैरूप्यापत्ते मैत्रीशौचवंतं श्रूद्रं प्रत्यानर्थक्य प्रसंगाच्च। यस्य यावदाशौचं प्राप्तं तदुत्तरमेव विंशतिरात्रं मासं वक
र्मानधिकार इति कश्चित्। तन्तुच्छं। यत्र हि एकेनैव पदेन स्वार्थ एकं पदार्थं प्रत्युद्दिश्यते ऽन्यं च प्रत्युपादीयते तत्र वैरू
प्यं। यथा वाजपेयेन स्वाराज्यकामो यजेतेति यजिपदेऽह दशाहोत्तरदिने चाधिकानधिकारमात्रं वाचनोन्नतत्। अन्य
या द्वादशाहीनस्यैव तत्राविप्रकृतिततिस्रणापुंसः सप्रांप्तत्त्वं शेषानुवादो विकां शेविधिरिति वैरूप्यं स्यात्। अनोजन्म
प्रभृत्येव विंशरात्रं मासं वयावदप्राप्ताहः कर्मानधिकारो वोध्यत इति। नात्वरणास्तु। प्राप्तदशमदिनादि कर्मानधिकार
वधिवाषेनाथ्यंतरमेवेदं वोध्यते। हीहि तोनरदातिनजुहोतीतिहोमानधिकारा व धिमत्त दीक्षो न्तो यकावमथ्यान्नरत्तवाचैनै
तयापुनराधेयसंमितयेपेष्ट्या अग्निहोत्रं जुहोतीत्युदवसानीयरूपावयांतरवदिति युक्तमुत्पश्यंति। प्रथमषष्ठदशमदिवसे
षुदानमस्तिकामदह देवतापूजनमात्राधनाशौचं यदाहव्यासः। प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा। त्रिष्वेतेषु न कुर्वीत

सूतकं पुत्रजन्मनि। स्वल्पंतरेपि। तत्र सर्वप्रतिग्राहं संकृत्तां नं तु न मद्भ्येत्। भक्त्वा विस्त्वा तु तमोहा। द्विजस्त्वां द्वापरांन्वोत॥ ॥
रतिजन्माशौचं॥ ॥अथानुपनीताशौचं। तत्र नामकरणात्प्राक् स्मृतौ शब्दः। प्राङ्नामकरणात्सद्यः शुद्धिरिति। नामक
रणादिति स्वकालोपलक्षणं दंतजननादिति वत्। नामकरणकालस्तु एकादशे ह नि द्वादशे षोडशे एकत्रिंशे इति क्रमाच्च तु
वर्णेषु। स्वरूपत एव तामकस्ति सद्यः शुद्धवदिति केचित्। नामकरणानंतरमप्युदकदानं वैकल्पिकं॥ तथा च मनुः। नात्रि
वर्षस्य कर्तव्या बांधवैरुदकक्रिया। जातदंतस्य वा कुर्यान्नाम्नि वापि कृते सति। उदकमग्रेरप्युपलक्षणं। नात्रिवर्षस्येत्य
त्र वर्षशब्दः। चूडोत्कर्षेऽपि वर्षत्रयादूर्ध्वमप्युदकदानादिनियतं। चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्त
व्यं श्रुतिनोदनादिति। आघवर्षीय चूडाकर्मानंतरमप्युदकदानं नियतं। तदुक्तं तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमेव
च। सर्वेषां कृतचूडानामन्यत्रापीच्छया द्वयं। अन्यत्र नामकरणादूर्ध्वं अकृतचूडस्य उदकपानमुदकदाने निखननं वा। तथा
व याज्ञवल्क्यः। ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः। आश्मशानमनुव्रज्य इतरो ज्ञातिभिर्वृतः। इतरः पूर्णद्विवर्ष
ऊनद्विवर्षस्य निखननमेवेत्याचारः। मनुरप्यूनद्विवर्षमपि कृत्वा परणे पकाष्ठवत्त्यक्त्वा क्षिपेत् पुत्रमह मेवाविति। नामकर
णाद्यूर्ध्वं सर्वेषां सद्यः शौचं नामकरणादूर्ध्वं दंतजननकालात् प्रथममासलक्षणात् अग्निसंस्कारे एकाहः। अग्निसंस्का
राभावे स सर्वेषां सद्यः शौचं नामकरणादूर्ध्वं उपनयनपर्यंतं सर्वेषां त्र्यहएव। निरस्यतु एमानं श्रुत्वं उपस्पृश्य विशुध्य
रेसघःशुद्धिः। मातापित्रोस्तु नामकरणादूर्ध्वं उपनयनपर्यंतं

शु॰म॰
५

तिा वैतिकादमिलंबं यादनुरूप्याद्यंत्रहमिति। कार्यकारणसंबंधेत्यहोक्तेः। ततो दंतजननादूर्ध्वं प्रथमवार्षिकचूडाकर्मप
र्यंतं अहोरात्रं। प्रथमवर्षादूर्ध्वं त्रिवर्षपर्यंतमकृतचूडस्य कृतदाहस्याप्येकाहः। कृतचूडस्य तु त्रीणि। वर्षत्रयादूर्ध्वं कुल
धर्मानुरोधेनाकृतचूडस्यापि त्रीण्येव। उपनयनादूर्ध्वं दशाहो त्रादिकं। अत्र सर्वत्र दंतजन्मनः सद्य आ चूडांते शिवी
मस्तत्ता त्रिरात्रमा व्रताद्दशाहः शरात्रमतः परमित्यादिवचनानि निमित्तानुरादाववनुसंधेयानि। अथापत्यमृतौ तु नाम
करणादूर्ध्वं वर्षत्रयपर्यंतमकृतचूडायाः सद्यः शौचं। अचूडायां तु कन्यायां सद्यः शौचं विधीयते इत्यापस्तंबोक्तेः। ततो
बाग्दानपर्यंतमहोरात्रं। प्रथमवर्षे कृतचूडायामपि मृतायां यावद्वाग्दानमहोरात्रमेव। अविशेषेण वर्णानामर्वाक्तस्मा
कारमर्पणाः। त्रिरात्रात्तु भवेच्छुद्धिः कन्यास्वह्नां विधीयते इत्यंगिरउक्तेः। एवं विषये क्वचिद्विषये एव कन्यास्वेकाह इति
न्यथकृतं ४। याज्ञवल्क्योपि। अहस्त्वदत्तकन्यासु बालेषु च विशोधनमिति। बाले पञ्जादंतेषु त्रिसंस्कार इति विज्ञानेश्व
रः। वाग्दानादूर्ध्वं तु विवाहसंस्कारात्प्राक् पतिपक्षे पितृपक्षे च त्रिपुरुषपर्यंतं त्रीण्यहोरात्राणि। स्त्रीणामसंस्कृतानां
तु त्र्यहाच्छुध्यंति बांधवाः। यथोक्तेनैव कल्पेन शुध्यंति तु सनाभय इत्युक्तेः। बांधवाः पतिसपिंडाः सनाभयः पितृसपिंडाः। ए
तच्च नाम्न ऊर्ध्वं विवाहात्प्राक् स्त्र्याशौचं त्रिपुरुषमेव। अप्रत्तानां तु स्त्रीणां त्रिपुरुषं विज्ञायत इति वासिष्ठात्। अत्र राम
सर्वत्र मातापित्रोः पुमपत्यवदेवाशौचं विशेषाश्रवणादिति केचित्। मदनरत्ने निर्णयामृते त्वाशौचं त्वतु विशेषमा ५

त्रिरात्रं

हा अज्ञातदंतासु पित्रोरेकरात्रमिति। इदं च नाद्रियंते शिष्टाः। विवाहानंतरं विष्णुः। संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रस
वमरणे चेत्पितृगृहे स्यातां तदैकरात्रं चेति। प्रसवे एकरात्रं मरणे त्रिरात्रमिति भेदः। पित्रोर्मरणे विवाहितकन्यायास्त्री
ण्यहोरात्राणि। अविवाहितायास्तु पुत्रादीनामिवाशौचमित्युक्तिर्ज्ञेयं। एतदाशौचं सर्ववर्णसाधारणं। वयोविशेषकृत
त्वादिति॥ ॥अथ मरणाशौचं॥ ॥मनुः। दशाहं शावमाशौचं सपिंडेषु विधीयते। जननेप्येवमेव स्यान्निपुणां शुद्धि
मिच्छतां। महागुरुनिपाते तु द्वादशरात्रं दानाध्ययनं वर्जयेदित्याश्वलायनोक्तेः। याज्ञवल्क्यः। क्षत्रस्य द्वादशाहानि
विशः पंचदशैव तु। त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिनः। पाकयज्ञद्विजशुश्रूषादिरतः शूद्रो न्यायवर्ती तस्य प
क्षः। अंगिरास्तु। सर्वेषामेव वर्णानां सूतके मृतके तथा। दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीदित्याह। अत्र देश
चारतो व्यवस्था॥ इदं च दशाहादि मृताशौचं उपनयनोत्तरं ततः पूर्वं त्र्यहादेरुक्तत्वात्। शूद्रो वस्त्रद्वयग्रहोदितिव
चनादुपनयनस्थानीयस्त्रीग्रहोत्तरं ततः शूद्रः स्वाशौचनिमित्तं। विप्रस्य सवर्णासपिंडजननमरणयोराशौचमाह हा
रीतः। दशाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु। षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु। दासादीनां तु स्वामि
शुध्या शुद्धिः कर्मानधिकारस्तु मासं तत्र त्वांगिराः। दासीदासस्त्वथ सर्वे वै यस्य वर्णस्य यो भवेत्। तद्वर्णस्य भवेच्छौचं
दास्या मासस्तु सूतकमिति। प्रतिलोमा धर्महीना इति स्मरणात्तेषामाशौचं। किं तु केवलं जनने मरणे च मलाप

शू॰म॰
६

कर्षणाद्यशौचमात्रं। क्वचित्सद्यःशौचमाह देवलः। उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च। सद्यः संतिष्ठते यज्ञस्तथाशौच
मिति स्मृतं। सद्यःशौचमित्यन्वयः। युद्धे दशाहकर्म एकदिन एव। तथा डिंबाशनिहतानां च विद्युता पार्थिवेन च। गोब्रा
ह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः। शस्त्रं विना कलहो डिंबाहवः। राजा यस्य कार्यार्थमिच्छति तस्य सद्यःशौचमित्य
र्थः। मनुयमः। डिंबाशनिहतानां च तथैव प्राणसत्रिणां। नदीश्वापददंष्ट्रिभ्यः सद्यःशौचं विधीयत इति। तत्र नदी प्र
हणं जलमात्रोपलक्षणं। तच्च प्रायश्चित्ताद्यर्थमृतानां न प्रमादेनेति शुद्धिविवेके। प्राणसत्रिणः पररक्षणार्थं
प्राणत्यागिनः। यत्तु बृहस्पतिना महाहवे विद्युता वा राज्ञा गोविप्रपालने सद्यःशौचं हतस्याहुस्त्र्यहं चान्ये महा
र्षय इति त्र्यहमुक्तं। तत्पराजयेव हतस्य युद्धे गाढप्रहारपीडया युद्धविरामोत्तरं रणांगणाद्बहिर्मृतस्य वा ज्ञेयं। इदं च
युद्धमृतस्य सद्यःशौचादिकं युद्धोद्देशेन प्रवृत्तस्य ज्ञेयं। नायुध्यतः चोरहतादेः। युद्धस्याभयनिष्ठत्वात्। अतस्तन्मृतो प
योक्तमेव। रात्रौ जन्ममृतिरजःसु विशेषमाह कश्यपः। उदिते तु यदा सर्वनारीणां दृश्यते रजः। जननं वा विपत्तिर्वा य
स्याहस्तस्य शर्वरी। अर्द्धरात्रावधिः कालः सूतकादौ विधीयते। रात्रिं कुर्यात्त्रिभागां तु द्वौ भागौ पूर्व एव तु। उत्तरो भागः प्रभा
तेन युज्यते ऋतुसूतके। रात्रावेव समुत्पन्ने मृते रजसि सूतके। पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो रविरिति। अत्रावा रण
रतो व्यवस्था। तत्रापि त्रिभागपक्षमेवाद्रियन्ते शिष्टाः। वृद्धाश्च रजस्वलाविषये स्वल्पान्तरं। वृद्धा भर्तुश्चतुर्थेह्नि स्नाने ६

नखी रजस्वला। दैवकर्मणापि त्र्यहं पंचमेह्नि शुध्यति। पंचमेह्नीति रजोनिवृत्त्युपलक्षणं। स्पर्शादिष्वनुपरतेपि रजसि
चतुर्थेह्नि स्नाने न शुध्यति। दैवपित्र्यकर्मविषये तु चतुर्थेह्नि स्नातापि रजोरहितैव योग्येति अर्थः। विशेषमाहात्रिः रजस्वला य
दि स्नाता पुनरेव रजस्वला। अष्टादशदिनादर्वागशुचित्वं न विद्यते। एकोनविंशतेरर्वागेकाहः स्यात्ततो द्व्यहं। विंशत्प्रभृतितस्तु त्रि
रात्रमशुचिर्भवेदिति। रजोदर्शनमारभ्य पुनः सप्तदशदिनाभ्यन्तरे रजोदर्शने अशुचिता नास्ति। अष्टादशे त्वेकाहाच्छुद्धिः। ए
कोनविंशे द्व्यहाद्विंशप्रभृतिषु त्र्यहाच्छुद्धिरित्यर्थः। यस्या विंशतिदिनोत्तरमेव बहुवारं रजोदर्शनं तद्विषयोयमशुचित्वप्र
तिषेधः। यस्याः पुनर्युवत्या अष्टादशदिनादर्वागेव प्राचुर्येण रजोनिःसरणं तस्याः क्षिप्रमेवाशुचित्वमिति मिताक्षरायां प
तु चतुर्दशदिनादर्वागशुचित्वं न विद्यत इति स्मृत्यन्तरं तत्र स्नानप्रभृतित्वमभिप्रेतमिति न विशेषश्च। रजस्वलासूतिकयो
र्मृतौ विशेषः स्मृत्यन्तरे। पंचभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां। वस्त्रान्तरावृतां कृत्वा दाहयेद्विधिपूर्वकं। तथा सू
तिकायां मृतायां तु कथं कुर्वंति याज्ञिकाः। कुंभे सलिलमादाय पंचगव्यं तथैव च। पुण्याभिरभिमन्त्र्यापो वाचा शुद्धिं
लभेत्ततः। तेन तां स्नापयित्वा तु दाहं कुर्याद्यथाविधीत्यादि। पुण्याभिः आपोहिष्ठेति तिसृः। हिरण्यवर्णाश्चतसृः। पुनं
मिति नवर्चेतु वाकः पठंति पद्मदूरकमिति। गर्भिणीमरणेपि स्मृत्यन्तरे विशेषः। यदा गर्भवती नारी सशल्या संस्थिता
भवेत्। कुक्षिं भित्त्वा ततः शल्यं निर्हरेद्यदि जीवति। प्रमीतं निक्षिपेत्तं तु प्रायश्चित्तं ततः परं। त्रयस्त्रिंशता कृच्छ्रेषु

शु॰म॰ ७ मुच्यते शल्यदोषतः सगर्भदहने तत्र द्विगुणं वधपातकमिति । आतुरशुद्धिमाह पराशरः । आतुरे स्नान उत्पन्ने दशकृत्वो ह्य
नातुरः । स्नात्वा स्नात्वा स्पृशेदेनं ततः शुध्येत्स आतुरः । उशना । ज्वराभिभूता या नारी रजसा च परिप्लुता । कथं तस्या भ
वेच्छौचं शुद्धिः स्यात्केन कर्मणा । चतुर्थेहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियं । सा सचैलावगाह्यापः स्नात्वा स्नात्वा पुन
ः स्पृशेत्तां दशद्वादशकृत्वो वा आचामेच्च पुनः पुनः । अंते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा । दद्याच्छक्त्या ततो दानं
पुण्याहेन विशुध्यतीति । वृद्धमते विशेषः । वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः । आत्मानं घातयेद्य
स्तु भृग्वग्न्यनशनांबुभिः । तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः । तृतीये तूदकं दत्वा चतुर्थे श्राद्धमाचरेदित्यादि
ना त्रिरात्रमुक्तं । वृद्धादिविशेषणादासन्नमृतिकालपरमेतत् । अनासन्नमरणानां वेणीप्रवेशपतिसहगमनादि
नावेक्षतो तु दशाहमेव साधारणं । शुद्धिविवेके तु वेणीप्रवेशादौ तु सद्यःशौचमुक्तं न तु तत्र किंचिदसाधारणं
लं । चंडालादिहतस्याशौचादिनिषेधमंगिराः । चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतानलात् । दंष्ट्रिभ्यश्च पशुभ्यश्च
मरणं पापकर्मणां । उदकं पिंडदानं च प्रेतेभ्यो यत्प्रदीयते । नोपतिष्ठति तत्सर्वमंतरिक्षे विनश्यतीति । एतज्ज्ञात्मघा
तोद्देशकस्य व्यापारे सति । प्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छतामिति गौतमोक्तेः । प्रायो महा राम ७
प्रस्थानं । हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनामिति याज्ञवल्क्योक्तेश्च । तद्देहप्रतिपत्तिश्च स्मृत्यंतरे । गंगायां प्रक्षि

पेद्देहं सरित्स्वन्यासु वा ततः इति । अग्न्यादिस्तु मितानां क्रूरायां वैतानं प्रक्षिपेदप्सु गृह्याग्निं चतुष्पथे पात्राणि च दहेद्देहमोपजम
ने वृथामृते । वृथामृते । वृथात्मघातेन । तथा । महापातकसंयुक्तो दैवात्स्यादग्निमान्यदि । पुत्रस्तान्पालयेदग्नीन्
युक्त आदोषसंक्षयात् । प्रायश्चित्तं न कुर्याद्यः कुर्वन्वा म्रियते यदि । गृह्यं निर्वापयेच्छ्रौतमप्स्वस्येत्सपरिच्छदमिति । आ
त्मघाते प्रायश्चित्तं निगमे । आत्मघातकशुध्यर्थं चरेच्चांद्रायणद्वयं । तप्तकृच्छ्रचतुष्कं च त्रिंशन्निष्काणि वा चरेदिति
। आत्मघातिदाहादौ प्रायश्चित्तं मिताक्षरायां । कृत्वाग्निमुदकं दानं स्पर्शनं वहनं कथां । रज्जुच्छेदाश्रुपातं च तप्तकृ
च्छ्रेण शुध्यतीति । एतन्मिताक्षरायां स्पर्शमात्रे चैकरात्रोपोषणमिति तत्र महाकृच्छ्राशक्तौ काष्ठाद्यंतरितस्पर्शे वा दे
यं । तप्तकृच्छ्रस्तु तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत् । एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृत इति । संवत्सरोर्ध्व
तु गवादिहतानामपि दाहादिकार्यमेव । गोब्राह्मणहतानां च पतितानां तथैव च । ऊर्ध्वं संवत्सरात्कार्यं सर्वमप्यौ
र्ध्वदेहिकमिति षट्त्रिंशन्मतात् । नारायणबलिं कृत्वा तु तदेव कार्यं । अर्वाक् संवत्सरात्कुर्याद्दहनादि यथोदितं । कृ
त्वा नारायणबलिं अनित्यत्वात्तदाप्युपद इति स्मृतेः । नारायणबलिः कार्यो लोकगर्हाभयान्नरैः । तथा तेषामे
वक्षौवं नात्यप्रेत्य ब्रवीषम इति कृष्णालेख्योक्तेश्च । विष्णुं समर्च्य देवं यमं वैवस्वतं तथा । एकादश्यां तु शुक्लायां प
वसंपात्र वरान्वा । हत्वा मृतानां शुध्यर्थं कार्यो नारायणो बलिः । दश पिंडान्घृताभ्यक्तान्दर्भेषु मधुसंयुतान् । ति

श्रु॰म॰ ८ लमिश्रान्नप्रदद्याद्देसंयुतोदक्षिणामुखइति।अथशौनकसूत्रार्थसारानुसारीप्रयोगः।शुक्लैकादश्यांपंचम्यांश्रवणेनवातिथ्या
दिस्मृत्वामुकशर्मणोऔर्ध्वदेहिकेसंप्रदानत्वसिद्ध्यर्थंनारायणबलिंकरिष्यइतिसंकल्प्यपंचकलशान्सजलानब्री
हिषुपंचसुनागेषुसर्वौषधदूर्वापल्लवसप्तमृत्फलरत्नसुवर्णशकलयुतान्वस्त्रवेष्टितान्संस्थाप्यतेषामुपरि
स्त्रादियात्रेषुब्रह्मविष्णुशिवान्वैवस्वतंयमंप्रेतंचपूजयेत्।तत्रक्रमान्मंत्राः।हिरण्यगर्भः।पुरुषसूक्तं।कद्रुद्रा
यमायसोमं।त्वतुर्थ्यंतनमोंतंचप्रेतनाम।ततोगृह्योक्तमार्गेणाग्निस्थापनादिनारायणदेवत्यचरुश्रपणांतं
कृत्वापुरुषसूक्तेनप्रत्यृचंषोडशाहुतीर्हुत्वास्विष्टकृदादिसमाप्यकलशसमीपेऽमुकगोत्रायामुकशर्मणेप्रे
तायविष्णुरूपिणेऽयंपिंडउपतिष्ठतामितिमधुघृततिलयुतान्दशपिंडान्प्राचीनावीतीदक्षिणाग्रकुशेषु
दत्वायत्तेयमपितिसूक्तेनानुमंत्र्यशंखोदकेनकुशैरभ्युक्ष्याभ्यर्च्यप्रवाहणांतंकृत्वानघ्राप्रदक्षिण्याममुकशर्मा
मुकगोत्रोविष्णुरूपीत्यक्तवितिपुरुषसूक्तस्यप्रत्यृचमंतेउच्चारयन्षोडशवारंप्रेतंसंतर्प्यब्रह्मविष्णुमहादेवा
यमश्चैवसविंकरः।बलिंगृहीत्वाकुर्वंतुप्रेतस्यवसुभांगतिमितिब्रह्मादीन्प्रार्थयेत्।तेभ्यःपुरुषाहारमि
तमन्नंबलिंदत्वाप्रतिदैवतंत्रिविधफलघृतशर्करामधूनिनिवेद्यपरदिनेकर्तव्यश्राद्धार्थंपंचविप्रान्नाम राम ८
न्त्र्यरात्रिंजागरणेनातिवाह्यपरदिनेमध्याह्नेब्रह्मादीन्संपूज्यतिथ्यादिसंकीर्त्यामुकशर्मणोमुकगोत्रस्यौर्ध्व

1

देहिकेसंप्रदानत्वयोग्यतासिद्ध्यर्थंपंचैकोद्दिष्टश्राद्धानितंत्रेणकरिष्यइतिसंकल्प्यश्राद्धानिकुर्यात्।तत्रदेवताब्रह्मादय
एवब्रह्मादीनांपूजापिंडदानादिषुसर्वाप्रेतविप्रायाभिकादक्षिणा।अहिरण्यादिकाअरूप्यस्थानेकुशतिलतुलसीयु
तशंखजलधारेतिविशेषः।ततस्तेविप्राःपवित्रहस्ताःअमुकशर्मणोऽमुकगोत्रायप्रेतायविष्णुरूपिणइदंदत्ति
लोदकमुपतिष्ठतामितिप्रत्येकंतिलोदकंदद्युः।यजमानःस्नात्वागुडशर्करायावसादियुतंस्वजनयुतोभुंजीतेतिना
रायणबलिप्रयोगः।मरणोद्देशेनसर्पसमीपगमनादिनासर्पेणाहतेतुवर्षपर्यंतप्रतिपंचमिनागंसंपूज्यवर्षांतेनाराय
णबलिंकृत्वासौवर्णंनागंगांचविप्रायदत्वासर्वमौर्ध्वदेहिकंकुर्यात्।तथाचव्यासः।पुराकल्पपयाठसुवर्णेन
निष्पन्नंनागंकृत्वातथैवगां।व्यासायविधिवद्दत्वापितुरानृण्यमाप्नुयात्।भारतिभन्त्रमितिवापाठः।भारःपलसह
स्त्रद्वयंतुला।त्रिंशत्पलशतंभारःस्याद्विंशतितुलेतिकोशात्।एतत्याठप्रायोशक्तस्यार्थविधिः।प्रमादमृतानांतु
चांद्रायणांतंप्रहत्वकृद्द्वयंतस्यविष्णुद्वयरति~~तुत्वेतिकोशात्।एतत्याठप्रायोशक्तस्यार्थविधिः।प्रमादमृतानांतुचां~~
प्रायश्चित्तंकृत्वासघएवदाहादिकार्यं।तथाचाहांगिराः।अथकश्चित्प्रमादेनम्रियेताग्न्युदकादिभिः।तस्याशौचंवि
धातव्यंकर्तव्याचोदकक्रियेति।पुराणे।असाध्यव्याधिनायुक्तःस्वव्यायाराहृमाःसुमानापविशश्यनलंदीप्तंकरो
त्यनशनंतुवा।अगाधतोयराशिंवाभृगोःपतनमेववा।गच्छेन्महापथंवापितुषारगिरिमादरात्।प्रयागवटशाखा

शु॰म॰ ९ यदा देहत्यागं करोति वा। स्वयं देहविनाशस्य प्राप्ते काले महामतिः। उत्तमानाप्नुयाल्लोकान्नात्मघाती भवेत्क्वचित्। महापापयुक्ता
स्त्वगोर्दिव्यान्भोगान्समश्नुते। एतेषामधिकारोऽस्ति सर्वेषां सर्ववर्णेषु। नराणामथ नारीणां सर्ववर्णेषु सर्वदेति। ऊर्ध्वोच्छि
ष्टमरणे पराशरः। ऊर्ध्वोच्छिष्टे यो च्छिष्टे अंतरिक्षे मृतिर्यदि। कृच्छ्रत्रयं प्रकुर्वीत अशौचमरणे त्विति तथा। ऊर्ध्वोच्छिष्टोध
श्चोच्छिष्टे अपोच्छिष्टे तथैव च। अस्पृश्यस्पर्शमरणे खट्वादौ मरणेऽपि च। श्वानक्रव्यादसंस्पर्शे कृमिकीटादिकेऽपि च। एतद्दोषा
नुसारेण प्रायश्चित्तं समाचरेत्। कृच्छ्रांस्त्रिषट्पंचदशाब्दं द्वायणमथापि वेति। अत्र दोषानुसारेण प्रायश्चित्ततारतम्यं
कल्प्यं। ब्रह्मचारिमरणोऽनंतरे विशेषः। येषां कुले ब्रह्मचारी निधनं प्राप्नुयाद्यदि। तत्कुले रूपमाप्नोति सोऽपि दुर्गतिमा
प्नुयात्। ग्रहत्वं प्राप्नुयाद्वापि द्विभुमेन वर्षं तु वसेत्। तस्यापि तस्य वंशस्य गतिमिच्छन्महीपती। विधानं च विधायाशु और्ध्वदेहि
कमाचरेत्। मृतस्य प्रियमाणस्य षड्वृद्धव्रतमादिशेत्। त्रिंशाद्यो ब्रह्मचारिभ्यो दद्यात्कौपीनकान्नवान्। हस्तमात्राः करी
मात्राद्दद्याद्गोक्षाजिनानि च। पादुकाछत्रमाल्यानि गोपीचंदनमेव च। मणिप्रवालमालाश्च ब्रह्मसूत्राणि चार्पये
त्। मंत्रैर्लिंगलिंगकेश्च ब्रह्मसायुज्यसिद्धये। अभावे व्रतिनां पूज्या गृहस्थाः सावधानः शुभाः। एवं कृते विधाने तु वि
घ्नस्तस्मान्नाप तरति स्नातकमरणे वा। स्नातको ब्रह्मचारी च निधनं प्राप्नुयाद्यदि। संयोज्य चार्कं विधिना संयोज्यो
... स्यरमिति। कुत्सितमरणे यमः। मृतस्य कुत्सितो देहं निखनेद्वाथ भूमिषु वा सरत्रितयपश्चादुद्धृत्यात्य राम ९

ऽत इहेत्। न गंगाप्लवनं कार्यं निह्नेपे विविरुध्यते। पउद्ध्वतपूर्वेणा विधिनं त्यंक्तुं चरेत्। ततोऽस्थिसंचयं तस्य गंगायां प्र
क्षिपेत्सुधीः। मासि मासि ततः कुर्यान्मासिश्राद्धानि पार्वणानि। संकल्पविधिना केचिदत्र वदंति मनीषिणा इति। पशुपितद
होगालवः। दिवा वा यदि वा रात्रौ शवस्तिष्ठति कर्हिचित्। तत्पर्युषितमित्याहुः दहने तस्य का गतिः। पंचगव्येन संस्नाप्य प्र
जापत्यत्रयं चरेत्। प्रेतधनहारिणः प्रेतक्रियाकरणे शंखः। प्रेतस्य प्रेतकार्याणि अकृत्वा धनहारकः। वर्णानां यद
वे प्रोक्तं तद्व्रतं प्रयतश्चरेत्॥ ॥ अथ मृतेतिकर्त्तव्यता॥ ॥ मनुः। न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाहरेत्। अस्वर्ग्या
ह्याहुतिः सा स्याच्छूद्रसंपर्कदूषिता। निर्हरणाशौचमाह मनुः। असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत्। विशुध्यति त्रि
रात्रेण मातुराप्तांश्च बांधवान्। यद्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति। अतदन्नमदन्नैव न चेत्तस्मिन् गृहे वसेत् इति।
तद्गृहवासिनस्तदन्नमखादतो निर्हृतवतस्त्र्यहं। तद्गृहवासिनस्तदन्नाशिनोऽपि तस्य दशाहं। अतद्गृहवासिनस्त
तद्गृहवासिनस्तदन्नमखादतो। बंधुवदित्यनेन धनग्रहणाभावे विना सवर्णाशौचवन्निर्हरणे दशाहाशौचमि
दन्नभोजिनश्च तस्याहोरात्रमित्याशयः। निर्हृतवतः सज्योतिः। अत्र तस्य श्मशानाद्ग्राममनुप्रविशेत् पुरा नक्षत्रदर्शनाद्रात्रौ चेदादि
तिलिंवधकृतः। ग्रामांतरवासिनो निर्हरणे तत्र उक्ताशौचं गोतमोक्तं। अनाथनिर्हरणे पराशरः। अनाथं ब्राह्मण
त्यस्येति यारस्करसूत्रे। अन्यवर्णानिर्हरणे तत्र उक्ताशौचं गोतमोक्तं ... न ते षाम शुभं किंचित्पापं वा शुभकर्मणां। तत्ला
प्रेतपेच हंति द्विजातयः। पदे पदे यज्ञफलमानुपूर्व्याल्लभंति ते।

१२

शु॰म॰
१०

वगाहनात्रेधा सद्यःशौचं विधीयते। संन्यासिनां मृतानां शौचं नास्तीति स्मृत्यर्थसारे। तथा ब्रह्मचारिसंन्यासिनामप्याशौचं नास्ती
ति। ब्रह्मचारिविषये योगी। आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती। स कटान्नं च नाश्नीयान्न च तैः सह संविशेत्। कटआ
शौचिस्वाध्यायाध्यर्थः तदन्नमाशौच्यन्नं अर्थादेतदन्यनिर्हरणे व्रतभंगः। हीनानुगमने आशौचमाह याज्ञवल्क्यः। ब्राह्म
णेनानुगंतव्यो न शूद्रो न द्विजः क्वचित्। अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक्शुचिः। द्विजो विप्रभिन्नः स्वाव्य
वहितहीनवर्णानुयाने तु ब्राह्मणे देवैसिष्ठोक्तमहोरात्रं। एकांतरानुव्रजने पक्षिणी। दिवसावुभयतः पक्षौ
द्वयं यस्या रात्रेस्सा रात्रिः पक्षिणी। द्व्यंतरत्वे पराशरः। प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः। अनुगच्छेन्नीयमानं स
त्रिरात्रेणाशुध्यति। त्रिरात्रे तु ततस्तीर्णे नदीं गत्वा समुद्रगां। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति योगी। सद्
गब्ध उपेतस्थे दाहिताग्न्याहृतार्थवत्। उपेत उपनीतः। आहिताग्न्याहृतात्। आहिताग्निदाहप्रक्रियया लौकिका
ग्निना। अपि विशेषं निषेधति देवलः। चंडालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित्। पतिताग्निश्चिताग्निश्च न
शिष्टग्रहणोचिता इति। यमः। यस्यानयति शूद्रोग्निं तृणकाष्ठहवींषि वा। प्रेतत्वं हि सदा तस्य स चाधर्मेण लिप्य
ते। अत्रानाहिताग्निर्विषयाग्निना। आहितास्रेस्तु श्रौताग्निभिरिति। तत्रापि स्नुग्व्योक्तविधिर्नैव। कात्यायनः। आ राम १०
हुतिं जुहोति पुत्रो भ्राता अन्यो वा ब्राह्मणः स्मात्त्वमविजातोसि त्वदयं जायतां पुनः। असौ स्वर्गाय लोकाय स्वाहेति।

अस्माच्चित्वं प्रेतनाम प्रथमं तं वदेत्। प्रचेताः। स्नानं प्रेतस्य पुत्राद्यैर्वस्त्राद्यैः पूजनं ततः। नग्नदेहं दहेन्नैव किंचिद्देयं परित्य
जेत्। किंचिद्देयं शववस्त्रैकदेशादिकं श्मशाने प्रदेयेदिति मिताक्षरायां। स्मृत्यंतरे। गोत्रोद्वारात्रिशेषे वा म्रियंते चेद्द्वि
जातयः। दाहं कृत्वा यथान्यायं द्वौ पिंडौ निर्वपेत्सुतः। परदिने आद्यद्वितीयो द्वावयववपिंडौ निर्वपेदिति केचित्।
रात्रावेवैकोवयवपिंडो विषम आद्यश्चापर एवं द्वाविति परे। स्मृतिसंग्रहेपि। रात्रौ दग्ध्वा तु पिंडांतं कृत्वा वपन
वर्जितं। वपनं नेष्यते रात्रौ श्वस्तनावयनक्रिया। संध्यायां वा तथा रात्रौ दाह इत्यादियाज्ञातो दाहकृतनिषेधकनिगम
वचनं तु दिनकृतस्य न संध्यादौ दाहादिकमित्येवंपरं। दाहानंतरं याज्ञवल्क्यः सप्तमाद्दशमाद्वापि ज्ञातयोभ्युपयं
त्यपः। अपनःशोशुचदघमतेन पित्र्यदिङ्मुखाः। सप्तमाद्दशमाद्दिनाद्रवीकृत्य पन इति मंत्रेण प्रथमतृतीयपं
चमसप्तमनवमेषु प्रेतस्य नामगोत्रमुच्चार्यैतत्ते उदकं ददुरिति विज्ञानेश्वरः। पुरुषं तु स्नान एव मंत्रोगमिति। अ
पनःशोशुचदघमिति दक्षिणाभिमुखा मज्जंति प्रेताय उदकं सकृत्प्रसिंचंतीति। अंजलिनासावेतत्ते उदकमिति पा
रस्करोक्तेः। प्रतिदिनमंजलिवृद्धिरपि ज्ञेया। अत्र दक्षिणाभिमुखत्वं ब्राह्मणस्योदङ्मुखो प्राङ्मुखो वा शूद्राज्जन्येष्वपि पारि
तिप्रचेतसा विशेष उक्तः। अत्र विप्रे दश जलयः क्षत्रिये द्वादश वैश्ये पंचदश शूद्रे त्रिंशदितिर्यमोक्तो विशेषोनुसंधा
तव्यः। एतच्चोदकदानं मातापितृमातामहाचार्यादीनां नित्यं। भागिनेयादीनामनित्यं। तथा च याज्ञवल्क्यः। एवं

शु.म. मातामहानां चार्यप्रेतानामुदकक्रिया ॥ कामोदकं सखिप्रत्तास्वस्रीयश्वशुरर्त्विजां ॥ हातिले सत्यपिद्धा चिन्निषेधस्तेनैवोक्त
११ ानब्रह्मचारिणः कुर्युरुदकं पतितास्तथा ॥ पतितानां प्रसूतद्विजातिकर्मावधिकाराः ब्रह्मचारिणामुदकदानादि नि
षेधो मातृपित्राद्यतिरिक्तविषयः तु कं प्राकृ ॥ आशौचिनिर्णयमाना ह याज्ञवल्क्यः क्रीतलब्धाशना भूमौ स्वपीरं स्व
पृथक्पृथक् ॥ पिंडयज्ञावृता देयं प्रेतायान्नं दिनत्रयं ॥ जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृन्मये ॥ आकाशे शिक्या
दौ ॥ द्रव्यद्वयनिधानसामर्थ्याद्द्वयोः शरावयोर्भेदेन निधानं प्रेतात्र स्नाहीतिमंत्रश्च प्रेतेदं पिवेत्युच्यते इति विज्ञाने
श्वरादयः ॥ हरिहरस्तु ॥ मृन्मये इति पात्रैकवचनसामर्थ्यात् प्रेतात्र स्नाहीति मंत्रेणैकत्रोभयनिधानं मन्यते ॥ गारुडे
दुग्धनिधानं प्रत्यहमुक्तं ॥ अपक्वे मृन्मये पात्रे दुग्धं दद्याद्दिनत्रयमिति ॥ मात्स्ये ॥ तस्मात्प्रेतपुरं प्रेतो द्वादशाहं न नीय
ते ॥ गृहं पुत्रकलत्रं च द्वादशाहं स पश्यति ॥ तस्मान्निधेयमाकाशे दशरात्रं पयस्तथा ॥ सर्वतापोपशान्त्यर्थमध्वश्रम
विनाशनमिति ॥ विष्णुर्यावत्साशौचं दिवा नितावत्पिंडदानमाह ॥ यावदाशौचं तावत्प्रेतायोदकं पिंडं च दद्युरिति ॥ पा
रस्करः ॥ प्रेतेभ्यः सर्ववर्णेभ्यः पिंडान्दद्युरशौचवत्तु ॥ मरीचिः ॥ प्रेतपिंडं बहिर्दद्याद्दर्भमंत्रविवर्जितं ॥ प्रागुदीच्यां च
रुं कृत्वा स्नातः प्रयतमानसः ॥ दर्भवर्जितत्वमनुपनीतविषयं ॥ असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कुशेष्वि राम
ति प्रचेतोवचनात् ॥ पाषाणे वा देयः ॥ भूमौ माल्यं पिंडं पानीयं उपले वा दद्युरिति शंखोक्तेः ॥ आशौचान्तपः ॥ दिवसे दिव १२

से देयः पिंड एवं क्रमेण तु ॥ सद्यः शौचे प्रदातव्याः सर्वेऽपि युगपत्तथा ॥ आशौचस्य ह्रासेऽपि पिंडान्दद्याद्दशैव तु ॥ त्रिरात्राशौचे
पारस्करः ॥ प्रथमे दिवसे देयास्त्रयः पिंडाः समाहिताः ॥ द्वितीये चतुरो दद्यादस्थिसंचयनं तथा ॥ त्रींस्तु दद्यात्तृतीयेऽह्नि व
स्त्रादि क्षालयेत्ततः इति गृह्यकारिकायां ॥ यत्र त्रिरात्रमाशौचं द्वितीयेऽह्न्यस्थिसंचयः ॥ भवश्राद्धं वृषोत्सर्गश्चतुर्थेऽह्नि समा
चरेत् ॥ आशौचं तु यदा सद्यो भवेत्तत्र कथं वचन ॥ यथाकालेन वश्राद्धमिति सत्यव्रतोऽब्रवीत् ॥ वृषोत्सर्गादिपत्तत्र कुर्या
देकादशेऽहनीति परिशिष्टे ॥ असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान् ॥ प्रथमेऽहनि यो दद्यात्स दशाहं समापये
त् ॥ प्रदीपहलंतवचः ॥ सगोत्रो वासगोत्रो वा योऽग्निं दद्यात्सखे नरः ॥ सोऽपि कुर्यान्नवश्राद्धं शुध्येत्तु दशमेऽहनीति ॥ अत्रापि
समानकर्तृतामात्रमेव विधेयं दशमेऽहनीति तु मानान्तरप्राप्ताशौचविधेरनुवादः ॥ यदि सत्रायदीक्षितानां सामु
तिष्ठासेत्सा मम पुमन्यथिस्नजितानि रात्रेस्मयजेत् तत्र प्राप्तविभज्यपड्व्याप्यलक्षकसोमपदवत्तेन ऋत्विपादिदीद
शाहादिभिः शुध्येत् ॥ त्रिरात्राशौचवांस्तु तावत्वापह्निणपकाहादिमानपित्रिरात्रेणैव ॥ असंबंधिद्विजात्वहित्वा
दहित्वा च सद्यः शौचं संबंधे त्रिरात्रमिति पैठीनसिना दाहमात्रे संबंधिनस्त्रिरात्रविधानात् ॥ दाहवहनयोः
साहित्यं त्वविवक्षितमनुवाद्यविशेषणत्वात् ॥ यत्तु केचिद्दाहपिंडदानादिनिमित्तं दशाहादिप्राप्ताशौचं च
रं तित्त त्रिर्मूलं पत्तु निर न्वियेस पिंडे तु मृते सति दयान्वितः ॥ तदशौचं पुरा चीर्त्वा कुर्यात्तु पितृवत्क्रियामिति

शु॰म॰ वचस्तदाशौचाप्रयोजकमतः शौ। चे मातामहादाहनिमित्तं त्रिरात्रं कृत्वा दशाहपर्यंतं क्रियां कुर्यात्। अत एव वृद्धैर्वैतिन्को
१२ वागतमाशौचसमाप्त्युत्तरकालत्वं क्रियासमाप्तेः संगच्छते। अथ वा ब्रह्मचर्यत्वाभावेस्त्रोहानुबंधे पि क्रियानिमित्ताशौचं भवतीति
ऽकृत्वैव दयपाब्रह्मचर्यक्रियां कुर्यादित्येतत्परम्। उत्तमवर्णादाहे त्ववश्यं दित्यादिमीतमीयंतज्ज्ञात्याशौचं। यच्च पितृत्राप
स्पर्शनं निर्हरणं व्याख्यातं मिताक्षरायां तथापि कैमुतिकन्यायेन दाहे पि तद्भवति। आहेयो सवर्णं तु मूल्येन नीत्वा वे
वदहेन्नरः। आशौचं तु भवेत्तस्य प्रेतजातिसमं नृपेति। मनुः। ज्ञात्यानां पाजनं कृत्वा परेषां मसकमेचा अभिचारमहीन
वत्रिभिः कृच्छ्रैर्विशुध्यतीति। अहीनयाज्ञकां त्वेष्टियाजकयोरेव तत्प्रायश्चित्तमिति विज्ञानेश्वरः। मेधातिथिस्त्वहीनस्यापि
हितत्वेन न तत्रेदं प्रायश्चित्तं किंतु रागप्राप्तेस्म घाजन एव परांत्यकर्मणास्तु निषिद्धत्वान्नत्वात्कृतालनैर्वेद मिति पुक्तमस्ये
।वतः स्वरसोप्येवं। देवलः। ब्रह्मचारी न कुर्वीत शववाहादिकाः क्रियाः। यदि कुर्याच्चरेत्कृच्छ्रं पुनः संस्कारमेव चेति।
आदिपदमलंकारादेर्ग्राहकं न तु दाहादेः। तत्र प्रायश्चित्तस्य गुरुत्वात्। पैठीनसिरपि। ब्रह्मचारिणः शवकर्मणा
व्रतान्निवृत्तिरिति। स्नेहलोभहेतुक्रियायाः सामान्यवचनेनैव निषेधे सिद्धे ब्रह्मचारिणां प्रति पुनर्निषेधः धर्मार्थम राम
पि निवारयति। अन्यथा वैयर्थ्यात्। मनुः। आचार्यस्वमुपाध्यायं मातरं पितरं गुरुं। निर्हृत्य तु व्रती प्रेतं व्रतेन न वि १२
युज्यत इति मिताक्षरायां गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरेत्॥ प्रेताहारैः समं तत्र दशरात्रेण शुध्यति

ति। प्रेताहारैस्तदन्नभोजनैः। एतद्दशरात्रं तदन्नभोजन एव। तदभावे त्वेकरात्रं वक्ष्यते। पुनरुपनयनं तु न भवति। क्रिया
या विहितत्वात्। आचार्यादिव्यतिरिक्तक्रियायां त्वाशौचं पुनरुपनयनं प्रायश्चित्तं च भवति अत एव याज्ञवल्क्यः।
आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रतीति। निर्हरणमग्निदानादि क्रियं तस्याप्युपलक्षणम्। अत एव भविष्य
पुराणे। ब्रह्मचार्यपि यथा पुत्रः पितुः कुर्यात् क्रियाः। तथा मातामहस्यापि दौहित्रः कर्तुमर्हतीति। माधवीये ब्राह्मे।
आचार्यंचाप्युपाध्यायं गुरुं वा पितरं तु वा। मातरं वा स्वयं दग्ध्वा व्रतस्थस्तत्र भोजनात्। हीत्वायततिनोतस्मात्प्रेतान्नं तत्र भ
क्षयेत्। अन्यत्र भोजनं कुर्यान्न चैतैः सह संवसेत्। एकाहमशुचिर्भूत्वा द्वितीयेह्नि शुध्यतीति। तु शब्देन तदाशौचवै
लक्षण्यं गम्यते। तेन पित्रादिभिन्नक्रियायां दाहे वहने त्वदन्नभोजने वा पूर्णाशौचं प्रायश्चित्तं पुनरुपनयनं। न भ
वंति। चांद्रिकायां संवर्तः। पित्रोर्गुरोर्विपत्तौ तु ब्रह्मचार्यपि यः सुतः। सव्रतस्थोपि कुर्वीत तस्य पिंडोदकक्रियां। तेना
शौचं न कर्तव्यं संध्यावंदनं लुप्यते। अग्निकार्यं च कर्तव्यं स्वाध्यायं तथैव नित्यशः इति। इदं च प्रागुक्ताग्निदाननिमि
त्तत्र्यहनिषेधार्थं। न तु दशाहादेः प्रसक्त्यभावात्। मातामहाचार्यकेभ्योन लज्जलति लदो ब्रह्मचारी तदीयाशौचं वद
ति त्रिंशत्यघस्पार्ध दिहिकपक्ष लग्नं दशाहाद्याशौचमिति केषांचिद्व्याख्यानं स्वरस्य चाभिप्रायं न जाने। यत्तु प्रकाशे प्रजा
पतिः। ब्रह्मचारी परः कुर्यात् पिंडं निर्वपणं पितुः। तावत्कालमशौचं स्यात्पुनः स्नात्वा विशुध्यतीति तत्रात्तवाक्य

शु॰म॰ लंजाह्नोत्क्रमेकाहमित्यर्थः॥ दिवारात्रमादयस्तु। आद्यदिने पूर्णमाशौचं संध्यादिकर्मलोपश्च। द्वितीयादिदिनेषु पिंडदा
१३ नादिकालएवाशौचं। नतुततःपूर्वोत्तरकालयोरित्याहुः॥ तन्न। ब्राह्मवाक्यमूलान्मूलांतरकल्पनापत्तेः। प्रत्य
हमनेकाशौचोत्पत्तिनाशकल्पनागौरवाच्च। हारीतः। विहितं हि सपिंडस्य प्रेतनिर्हरणादिकं। दोषस्याल्पस
पिंडस्य तत्रनाथक्रियाविनेति। याज्ञवल्क्यः। ब्राह्मणेनानुगंतव्यो न शूद्रो न द्विजः क्वचित्। अनुगम्यांभसि स्ना
त्वा स्पृष्ट्वाग्निं घृतभुक्शुचिरिति। मनुः। अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचैलः स्पृष्ट्वाग्निं घृ
तं प्राश्य विशुध्यतीति। ज्ञातिः सजातीयमात्रं न तु सपिंडः। तदनुगमने दोषाभावात्। इदं च घृतप्राशनं कृच्छ्रे
क्षयाठेन तत्त्वाभावेपि तपश्चात्तकषायच्छित्तत्वात् भोजननिवर्तकं। स्नानेतरहीनवर्णसपिंडानुयाने एकाहं प्र
कृत्यवतिष्ठः। शवानुगमने चैवमिति। विप्रस्य वैश्यानुयाने तु पक्षिणीति विज्ञानेश्वरादयः। पराशरस्तु मृतं तु वै
श्यमज्ञानात् ब्राह्मणो योनुगच्छति। कृत्वाशौचं द्विरात्रं स प्राणायामान् षडाचरेदिति। एतद्देव क्षत्रियस्य शूद्रसु
यानेप्यीति ग्रंथकृतः। तथैव दशश्लोक्यामपि पराशरः प्रतीमं तं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः। अनुगच्छेन्नीय
मानं स त्रिरात्रेणाशुध्यति। त्रिरात्रे तु ततस्तीर्णे नदीं गत्वा समुद्रगां। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति। राम
ज्ञानदुर्बलः ज्ञातमूर्ख्यः। एवमज्ञानादित्यत्रापि। ब्राह्मे। ब्राह्मणास्त्वन्यवर्णानां न करोति कदाचन। कामान्मोहात् १३

भयाल्लोभात्कृत्वा तज्जातितां व्रजेदिति। ब्राह्मणापरंमुपलक्षणं। वर्णानामिति सामान्यतो ग्रहणान्नपिहीनजातिपरमे
व। तत्राप्रेरेवानिष्टत्वात्। कामादिग्रहणाच्च धर्मार्थं द्विजस्य द्विजक्रियायां न दोष इति गम्यते। शुनःपुच्छः। शालिना
सक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत्। प्रथमेहनि यद्द्यात्तद्देव स्याद्दशाहिकं। भविष्योत्तरे। गृहद्वारे श्मशाने च तीर्थे
देवगृहे तथा। यत्राद्यो दीयते पिंडस्तत्र सर्वं समापयेत्। निगमः। एकस्तोयांजलिर्देयः प्रथमेकं च दीयते। द्वितीये द्वौ
तृतीये त्रींश्चतुर्थे चतुरस्तथा। पंचमे पंच षट् षष्ठे सप्तमे सप्त एव हि। अष्टमेष्टौ च नवमे नवैव दशमे दश मयेन
सुः पंचपंचाशत्तोयस्यांजलयः क्रमात्। तोयपात्राणि तावंति संयुक्तानि तिलादिभिः। पंचभिः पंचभिस्त्वेति पात्रे रंज
लिभिस्तथा। एकादशे वैंद्राणि कर्षितेशाख्यदर्शनादिति। पिंडश्च पुराणे। तिलाः क्षीरं तथा तोयं धूपं दीपं तथा बलिः। म
धुसर्पिः समायुक्तं पिंडमाहुर्मनीषिण इति। तथा। अर्घैः पुष्पैस्तथा धूपैर्दीपैस्तोयैश्च शीतलैः। ऊर्णतंतुमयैः शुद्धै
र्वासोभिः पिंडमर्चयेदिति। स्मृत्यंतरेपि। अमो पिंडप्रदानं च कर्षूत्कृत्वा विधानत इति। कर्षूस्तु प्रादेशमात्रदीर्घाश्च
तुरंगुलविस्तारास्तावदेव निम्ना यमस्वरूपा। अस्थिसंचयने संवर्तः। प्रथमेह्नि तृतीये वा सप्तमे नवमे तथा। अस्थिसं
चयनं कार्यं द्विजैस्तद्गोत्रजैः सह। क्वचित् द्वितीयेप्युक्तं। वैश्ये तु चतुर्थे दिवसे अस्थिसंचयनं कुर्यात्तेषां च गंगांभ
सि प्रक्षेप इति। प्रक्षेपोपि यथा। पट्टवस्त्रैः कौशेयमांजिष्ठश्वेतवस्त्रकंबलशाणपट्टाजिनैरष्टभिरूर्ध्वपुर्यादि संवेष्ट्य

चगायेन प्रक्षाल्य सम्यग्दशिखानानि कृत्वा श्रीनियलाशपत्रपुटे संस्थाप्य पुनर्मधुघृततिलहेमशकलैः सह मृत्पिंडे निधा
यकृताय सव्योनाभिमात्रे जले मृतनामगोत्राद्युच्चारणपूर्वकं मृतश्राद्धपूर्वकं च प्रक्षिप्य पर जतं ज्ञाह्मणाय दद्या
त्। एवं गंगायां ततद्देये स्वर्गः। प्रयागादौ तु मुक्तिरयी तिफलं। वपन विषये देवलः। दशमेहनि सं प्राप्ते स्नानं ग्रा
माद्बहिर्भवेत्। तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि तु। वपनादि च दशमपिंडदानोत्तरं। समाप्य दशमं
पिंडं प्राशास्त्रमुदाहृतमिति ब्रह्मपुराणात्। भौमार्कमंदवारमलिम्लुचशुक्रास्तादौ गंगायामस्थिप्रक्षेपनकु
र्यादिति त्रिस्थलीसेतौ। तथा अस्थिक्षेपं गयाश्राद्धश्राद्धं चापरपक्षिकं। प्रथमेब्देन कुर्वीत कृते पितृसपिंडने। प
दिनस्यात्सपिंडनमिति कविवत्याठः। अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपक्षिकं। प्रथमब्देपि कुर्वीत यदि स्याद्र
क्तिमान्सुत इति। दर्शश्राद्धं गयाश्राद्धं इति कविस्याठः। अत्र पुत्रइत्येवो द्देश्यसमर्पकं। भक्तिस्तु कर्मगतया
प्राप्तान्द्यते। अतः सुते नाद्यादिकार्यं नान्येन। सत्यंतरे पिद्वितीयेक्षि प्रकर्तव्यमेकमपि फलतः। तृतीये पंच
मे वापि सप्तमे वा प्रदानतरति। ऐकादशाहिकश्राद्धप्रदानादर्वागित्यर्थः। आपस्तंबः। अनुमाविनां चपरिवा
पनमिति। अनुभाविनः कनिष्ठाः सर्वे सपिंडाः। पुत्रा एवेति मिताक्षरायां। अनुपनीततनुत्रयत्नो दीहाधिका
रमाह कात्यायनः। असंस्कृतेन पत्न्या वह्निनिदानं समंत्रकं। कर्तव्यमितरत्सर्वं कारयेदन्यमेव हि। कृतचौल

स्तृतीयवर्षान्नं सर्वमौर्ध्वदेहिकं कुर्यात्। अनुपेतोपि कुर्वीत मंत्रवत्पैतृमेधिकं। यद्यसौ कृतचूडः स्याद्यदि स्यात्त्रि
वत्सरइति सुमंतुः। अत्र विशेषराद्धप्रमपि विवक्षितं विशेयकर्तृगतत्वात्। षष्ठपिंडोअपि सत्यंतरे। श्वा
नेचाद्विपत्येती ते चिताग्नौ शावहस्तके। श्मशानवासिभूतेभ्यः पंचमं प्रीतिवेश्मके षष्ठः सैच यत्नेप्रोक्तो दशपिंडा द
शाहिकाः। आद्यषोडशके चैतत्प्रथमं परिकीर्तितमिति। प्रातिवेश्यको द्वारदेशस्थः। कर्मप्रदीपेपि। ठक्तौ तौ
द्वारदेशे च विश्रांतौ शवहस्तके। स्तं वेसं चयने वापि षट्सुपिंडांश्चनिर्वपेदिति। स्तंवश्मिता। कुशमुष्टिरित्यन्ये
। ब्रह्मपुराणे। क्षिप्तोवा दग्धदेहो वाम्भ्यपदेभक्षितोपिवा। अग्रमुत्पादयेत्तेषां पिंडदाने दशाहिकेः। आति
वाहिकदेहस्तु प्रेतपिंडसमन्वितः। न हि भोक्तुमवाप्नोति पिंडांस्तत्रैव सोश्रुते। आतिवाहिकदेहः प्रेतशरीरं। कृते
वाहिकदेहस्तु प्रेतपिंडसमन्वितः। न हिमो क्रमवाप्नोति पिंडांस्तत्रैव सोश्रुते।
सपिंडीकरणात ततः संवत्सरात्परं। प्रेतदेहं समुत्सृज्य भोगदेहं प्रपद्यते। शिरस्त्वाद्येन पिंडेन प्रेतस्य क्रियते तथा
। द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः। गलांसभुजवक्षांसि तृतीयेन तथा क्रमात्। चतुर्थेन तु पिंडेन ना भि
लिंगगुदानि च। उरू जंघे तथा पादौ पंचमेन तु सर्वदा। सर्वमर्माणि षष्ठेन सप्तमेन तु नाडयः। दंतलोमान्यष्टमेन ष्
लिंगगुदानि च। ऊरू जंघे तथा पादौ पंचमेन तु सर्वदा। सर्वमर्माणि षष्ठेन सप्तमेन तु नाडयः। दंतलोमान्यष्टमेन
रिलिंबं तु द्विपर्यय। जायते नवमेनाथ दशमेन तथा क्रमादिति। वृद्धवसिष्ठः। अन्नं चाद्यं तु नवश्राद्धं प्रेतत्वान्न विमु
च्यते। अर्वाक्तु द्वादशाहस्य लब्धा लरति दुष्कृतमिति। अंगिराः। प्रथमेक्षितृतीयेक्षि पंचमे सप्तमे तथा। नवमे

शु॰प्र॰ कादशेऽह्न्येव नवश्राद्धं तदुच्यते। नगरखंडे। त्रिंशत्संचयनस्यार्थं तां निवेश्य शृणु संप्रतं। यत्र स्थाने भवेन्मृत्युस्तत्र श्राद्धं प्रकल्प
१५ येत्। एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारितः। ततः संचयनस्थाने तृतीयं श्राद्धमुच्यते। पंचमे सप्तमे तद्वदष्टमे न
वमे तथा। दशमे कादशे चैव नवश्राद्धानि तानि षट्। इति नवसंख्याकान्युक्तानि। भविष्यत्पुराणे। नवसप्तविशेराद्यं
नवश्राद्धान्युत्क्रमात्। आद्यंतयोर्वर्णयोस्तु षडित्याहुर्महर्षय इति। बह्वृचपरिशिष्टे। अनुदकमधूपं गंधमाल्य
विवर्जितं। नवश्राद्धममंत्रं च पिंडोदकविवर्जितं। अनुदकमर्घ्यरहितं। पिंडोदकं प्रत्यवनेजनोदकं। शातातप
ः। सूतके मृतके प्राप्ते द्वितीयं मृतकं यदि। पिंडदानं प्रकर्तव्यं वृषोत्सर्गं तथैव च। आरब्धे प्रेतपिंडे तु मध्ये चेज्जन
नं भवेत्। तथैवाशौचपिंडांस्तु शेषान्दद्याद्यथाविधीति। यत्तु स्मृत्यंतरेपि। न हन्यात्सूतकं कर्म श्राद्धं दशैकादशा
हिकं। शुद्धो वा यदि वाऽशुद्धः कुर्यादेवाविचारयन्निति। तन्मूलं मृग्यं। दशाहमध्ये दर्शपाते ऋष्यशृंगः। आशौचमं
तरा दर्शो यदि स्यात्सर्ववर्णिनां। समाप्तिं प्रेततंत्रस्य कुर्यादित्याह गौतमः। भविष्यत्पुराणेपि। प्रवृत्ताशौचतंत्रस्तु यदि
दर्शः प्रपद्यते। समाप्य चोदकं पिंडं स्नानमात्रं समाचरेत्। आशौचासमाप्तिपर्यंतं प्रत्यहं स्नानमाचरेदित्यर्थः। पै
ठीनसिरपि। आद्यंदेव कर्तव्याः प्रेतपिंडोदकक्रियाः। द्वितीये तु कुर्वाणः पुनः शौचं समश्नुते। मातापितृविय राम
यत्तु गालवः। पित्रोराशौचमध्येपि यदि दर्शः समायते। नावत्तेनांतरं तंत्रं यमविस्तारमाहात्वरमिति यत्तु गौतमः। १५

ऽतर्दशाहे दर्शश्चेत्तंत्रं सर्वं समापयेत्। पित्र्यं तु यावदाशौचं दद्यात्पिंडजलांजलीन् इति। तत्तु अहांतर्दर्शपरं इति पितामहचरणा
ः। कालात्तद्दर्शेपि वा। यत्तु मदनो गौतमीयमौरसपुत्रपरं। गालवं त्वनौरसपरमिति। तन्न। वैपरीत्यस्यापि संभवेन विगमनावि
रहात्। यदपि स एव माधवनिर्णयामृतकारौ च गालवमापद्विषयमाहुः। तदपि न मानाभावात्। अहमध्ये आपदि तदुत्तरं च
तदभावे गौतमीयस्यापद्विषयतया वैपरीत्यस्यापि सुवचत्वेन विनिगमनाविरहात् इत्यलं। मत्स्यपुराणे। दशाहाभ्यं
तरं पुत्रो वृषोत्सर्गस्य पूर्वकं। आरभ्यैतत्तु विधिवत्कृत्वा श्राद्धमेकादशेऽहनि। वृषोत्सर्गं कृत्वेत्यर्थः। वृषोत्सर्गप्रयोगस्तु श्राद्ध
मयूखे उक्तः। स्त्रीविषये। पतिपुत्रवती नारी भर्तुरग्रे मृता यदि। वृषोत्सर्गं न कुर्वीत गां तु दद्यात्पयस्विनीमिति विशेषश्च
वृषोत्सर्गादिपूर्वं विष्णुतर्पणमुक्तं गारुडे। पूर्वं तु तर्पणं कार्यं मंत्रैः पौराणवैदिकैः। वैष्णवैर्हुते मिश्रं विष्णुमुद्दिश्य
तर्पयेत्। कांस्यपात्रे स्थलेन मंत्रैरपि च वैष्णवैः। दक्षिणाभिमुखो भूत्वा प्रेतं विष्णुमिति स्मरन्। अनादिनिधनो देवः शं
खचक्रगदाधरः। अव्ययः पुंडरीकाक्षः प्रेतमुक्तिप्रदो भवेत्। पैठीनसिः। एकादशाद्द्विपक्षाद्दत्तत्साम्यमुदाहृतं। चतुर्णाम
पि वर्णानां सूतकं तु पृथक्पृथक्। लौगाक्षिः। आद्यं श्राद्धमशुद्धोपि कुर्यादेकादशेऽहनि। कर्तुस्तात्कालिकी शुद्धिरशु
द्धः पुनरेव सः। आद्यं श्राद्धमिति सर्वैकोद्दिष्टप्रकृतिभूतं। याज्ञवल्क्योपि। मृतेऽहनि तु कर्तव्यं प्रतिमासं तु वत्सरं। प्र
तिसंवत्सरं चैवमाद्यमेकादशेऽहनि। आद्यमेकादशेऽहनीत्यनेनाद्यदिनप्राप्तयोराद्यमासिकाद्यवार्षिकयोरेकाद

शु.म. १६ शाहत्वकर्षो विधीयते। अथ मृताग्निहोत्रप्रकारः। कारिकासु। मृताग्निहोत्रं होतव्यं प्राग्दाहात्तत्र कथ्यते। प्राचीनावीति
ना सर्वेषां समेवो द्वरे त्वरे। शंस्य आहवनीयः सादनाभावतः कूर्चस्थापनं नाम वेदिह। प्रागग्रैर्दक्षिणाग्रैश्छन्नस्तरोः
शंस्य परिस्तृतिः। पर्युक्षणं च तस्यैव कार्यमित्रा प्रदक्षिणं। नयीद्दक्षिणातो भस्म निरुह्याग्निं वसं विनी। नयीगार्हपत्य
ः। संविनीगर्भिणीगोः वत्सान्तरेणादोग्ध्रीवा दुग्धं भस्मन्य विश्रियावद्याल्पसेक वर्जितं। उद्धासयेत्तदासाघ दक्षिणा
स्रुकू स्रुवतनः। प्रताध्यप्रेषरहितं तत्पयः सकृदुन्नयेत्। धारयेत्समिधं त्वघो नं यद् दक्षिणातो नयेत। तूष्णीं समिधमाधा
यसर्वं जानुनियात्स्व। अथ मसंबंधं स्रुवं ह्वात्वा सकृत्सर्वं विनिक्षिपेत्। ततः कृष्णाजिने श्वीनि पुरुषाकारवन्यसेत्। ऊरणि
मिश्रान्त्यक्त्वा निघृतेनाभ्यज्य पूर्ववत्। पात्राणी योजयित्वा तं दहेत्त्रेताग्निभिस्तत इति। इदं च मृताग्निहोत्रं देशांतरात
मृतकलेवरागमनानंतरं कृत्वा कलेवरं दग्धव्यमिति केचित्। अन्ये तु प्राकृताग्निहोत्रद्वानेमृता मिति वदंति। दा
हेपघघाहिताग्निमग्निभिर्दहंति यत्तपात्रोच्छ्व त्यविशेषेणाग्रयः। अत्तास्तथापि तयो यः पूर्वं म्रियते तस्य त्रेताग्नि
ट मेघः संपद्यत इति सूत्रात्। आहिताग्न्योश्च द्वयोर्मध्ये ये म्रियते तस्यदेहः सर्वदा तु दग्धव्यस्त्रिभिरग्नि
रितिपश्चान्मृतस्य देहस्तु दग्धव्यो लौकिकाग्निना। अनाहिताग्निदेहस्तु दाह्यो गृह्याग्निना द्विजैरिति उक्तं पुराणवचना राम १६
त्रेताया एव दाहसाधनत्वात्तत्सद्भावसम्पयोः। समावसथ्या वाहिताग्नेर्दहनकर्मणि न प्रयुज्येते। चिताप्रदेशात्त्रा

गुदीच्यां दिशि पर्वपक्क मानतिक्रम्योत्सृजतीति शाखायनिवचनात्। स्त्रीमरणे कुंदोगपरिशिष्टे विशेषः। अनयैवाहृ
ता नारी दग्धव्या पियवस्थिता। अग्निप्रदानमंत्रोऽस्या न प्रयोज्य इति स्थितिः व्यवस्थिता साध्वी। आवृत्प्रकारः। अ
साध्वीतु केवलाग्निभिः। पात्राणि तु चिते रुत्तरतः समीपे तदग्न्येकदेशेन पृथग्दग्धव्यानि। अतिनिंदिता तु के
वलाग्निभिरपि न दग्धव्येति तद्धेतो। एवं अनेकभार्यस्य ज्येष्ठायां त्रीवयां सहाहिताग्निर्दितीयापि स्त्री गार्हप
त्यैकदेशेन त्रिभिर्वाग्निभिर्दग्धव्या। तस्मात्त्रयैकदेशेन दग्धव्या पूर्वमारणी। पत्नी ज्येष्ठतरा वापि यज्ञपार्श्वे
निरूपितं। तथा स्त्रीमात्रमविशेषेण दग्धव्यं वैदिकाग्निभिरित्युभयथा वचनसद्भावात्। वैदिकाग्निभिर्दाह
पक्षे चेत्तलो ज्येष्ठया सह पुनराधानं। आधानोत्तरकाले याविवाहिता स्त्री सा तु वैदिकाग्निभिर्न दग्धव्या। किंतु गार्हपत्यै
कदेशेनेति केचित्। परंतु स्मार्ताग्नि सत्वे तेन तदभावे लौकिकेनेत्याहुः। विशेषमाह मंडनः। अग्न्यावरणेपाणौ रूढेऽप्रमी
येत यतिर्यदि। प्रेतं स्पृष्ट्वा मथित्वाग्निं जुह्वाचोपावरोहणं। घृतं च द्वादशे पात्रे तूष्णीं हुत्वा शवक्रियां। उपावरोह
जातवेद इमं प्रेतं स्वर्गाय लोकाय नय प्रेता हुतीवा स्य जुषस्व स्वाहेत्युपावरोहणमंत्रः। अग्निनाशे यजमानमृ
तौ कारिकायां विशेषः। अग्निनाशे मृतिश्चेत्स्यात आहिताग्नेस्तदोच्यते। नयेल्लौकिकं मथित्वेनं संस्कुर्युस्तं दभावत
ः। तद्ग्राम सस्पृष्टकाष्ठे मथित्वा निर्दहेच्च तं। नष्टे च अग्निं धारणे नाशे स्वामी म्रियेत चेत्। आहरेदरणिद्वंद्वं मांधा

शु·म· नोक्तं च तद्यथा। अथ विच्छिन्नाग्नेरुत्सन्नाग्नेश्चाधानमाह मंडनः। विच्छिन्नमग्निमुत्सृष्टपावकं विधुरानलं। आहिता
१७ ग्निं मृतं दग्धुं त्रेताग्न्युत्पत्तिसिद्धये। भरद्वाजादयः प्राहुः प्रेताधानं विधिक्षमं। प्राचीनावीतवान् कुर्यादाग्न्या
गारे तथा खरान्। तत्राग्नीनां च संस्कृत्य प्रेतस्याभ्यासेन हि येत्। अग्न्यालयेऽरणी स्थाप्य मंथयस्वेति मंत्रतः। यस्थाय
योऽजुह्वतो मांसकामाः संकल्पयंत यजमान। ध्यायंतेतहविषे सादिताय स्वर्गलोकमिमं प्रेतं नयंति तिमं च
नमंत्रः। तस्मीमुद्धत्य शंसाग्निं संस्कृतेन वसर्पिषा। शंस्येदुत्वोत्सुवा तूष्णीं गृहीत्वा द्वादशस्रुवान्। दक्षिणाग्निं
समुद्धृत्य निर्दहेत्पूर्ववत्स्रुवं। उत्सन्नाग्नेररणिसंबद्धा वेएवं। अरण्योरभावे तु उत्सन्नाग्नेर्मृतस्याप्यनस्तः पूर्वेण
दारणी। आनीयान्ये तयोः प्रेतपाणिं स्थाप्याथ दक्षिणं। अग्नेतदूतिपुत्रादिः समारोपय जुजुर्जयेत्। मृताग्न्या
धानवत्सर्वं कृत्वा तं पूर्ववद्दहेत्। अनाहिताग्नेरप्येवं मृतावानंयथोदितं। अनाहिताग्नेरिति तु स्मार्ताग्निका
तीयादिपरं। तेषां स्मार्ताधानाभावात्। यादि मृते भर्त्तरि भार्या म्रियेत तदा रणी संपाद्य मंत्रवदग्निं निर्मथ्यते
ना ग्निना पात्रैर्विना दाहः। एवं भार्यामरणोत्तरकालं मृतस्य पुंसो निर्मथ्येनैव दाह इति कात्यायनानुसारिणः। अ एम
थ प्रेतक्रियायां निषिद्धकालः॥ तत्र गार्ग्यः। प्रत्यहत्य वसंस्कारे दिनं नैव विशोधयेत्। आशौचमध्ये क्रियते १७
पुनःसंस्कारकर्म चेत्। शोधनीयं दिनं तत्र यथासंभवमेव तु। आशौच विनिवृत्तौ च यतः संस्क्रियते मतः।

संशोध्यैव दिनं ग्राह्यं तु वत्सरादि। प्रेतकार्याणि कुर्वीत श्रेष्ठं तत्रोत्तरायणं। कृष्णपक्षस्तु तत्रापि वर्ज्यं चदिनत्र
यमिति प्रेतश्राद्धप्रकृत्यगार्ग्यः। नंदायां भृगुवारे च दिने त्वतुर्दश्यां त्रिपुष्करे। नत्रामाद्धं न कुर्वीत गृही पुत्र धनक्षया
त्। त्रिपुष्कर योग स्वरूपं रत्नमालायां मुहूर्तः। विषमचरणं भद्रातिथिर्यदि जायते गुरुशनि कुजाः पुत्राणां कौ
यं वनवासरे। मुनिभिरुदितः सोयं योगस्त्रिपुष्करसंज्ञितस्त्रिगुणफलदो वृद्धौ नष्टे हृते च मृतेप्यवेति। प्रेत
क्रियाप्रकृत्य महाभारते। तत्कृत्रेण न कुर्वीत यस्मिन् जातो भवेन्नरः। तत्रोष्ठ पद्योः कार्यं तत्रापि एवं भारत।
ज्योतिःपराशरः। साधारणे ध्रुवे प्रेमे श्रेनो शस्यते मनुष्याणां। प्रेतक्रियाकर्म विन्त्रिपुष्करेयमलयिष्णेवासा
चारणोक्तिकाविशाखे। ध्रुवागणुत्तरात्रयं रोहिणी च। उग्राणि पूर्वात्रयं भरणी मघा च। मैत्राणि मृग चित्रानु
राधरेवत्यः। यमलयिष्णेवं निष्ठाः। वाराहास्वराणो। चतुर्थाशुभमेवं द्वादशो च विवर्जयेत्। प्रेतकृत्येच तीया
तिथे वर्त्तेयरिपु तथा। क्रूरेणैव विद्धि संते च शनेश्वरदिने पि च। त्रयोदश्यां विशेषेण जन्मताराच्यं तथा। जन्मता
राय माघ दशमे कोनविंशानिनक्षत्राणि। कश्यपः। भरण्यार्द्रा तथाश्लेषा मूलं प्रिवरणं निव। प्रेतकृत्येत
दुष्टाति धनिष्ठाद्यं च पंचकं। फाल्गुनीद्वितयं रोहिण्यनुराधा पुनर्वसुद्वे आषाढे विशाखा च भानिद्धि चरणा
निचारणानीति किंचिद्दुष्टानि वर्जयेत्मति संभवरिति। यदा षोडशश्राद्धानि एकादशाहो द्विमुस्वस्वकालेषु

श्रु·म·
१६

क्रियं ते नंदानंदादिकं न वर्जनीयमित्याह गोभिलः। नंदायां शुक्रवारे च चतुर्दश्यां त्रिजन्मसु। एकादशाहप्रभृति नै
कोद्दिष्टं निषिध्य तदिति। प्रेतक्रियामापूर्य स्थितायां देवासुरादिप्रभृतीनामुपनिपाते दिनशो यंत विनैव तत्र प्रेत
क्रिया कार्या॥ तथा वत्सरांतरे। शुभमन्वादिसंक्रांतिर्दर्शप्रेतक्रियाय दि। दैवादापतिता तत्र न कुर्यात् द्विशीव
नं॥ ॥इति प्रेतक्रियायां पुनि षिद्धकालाः॥ ॥अथ पलाशप्रतिकृतिः। तत्र कल्पतरौ। अस्थीनि चेन्न लभ्यं
ते प्रोषितस्याग्निहोत्रिणः। पलाशपत्रवृंतानां षष्ट्याधिकशतत्रयं। कृष्णाजिने नराकारं कृत्वा वेष्ट्याजिने
नैतं। ऊर्णासूत्रेण बध्वैव यवपिष्टैः प्रलेपयेत्। निर्दिश्य देवदत्तायं नाम्नेत्याहाश्वलायनः। अन्त्याद्यपि न द
हेत्कृत्वा मद्दिग्धं संचयार्यत इति। मद्दिग्धमिति यवपिष्टलेपोत्तरं मृदाप्यालिप्य दग्ध्वा धूम्रस्थाने तां दग्धां
मदंसंविनुयादित्यर्थः। अत्र वृंतपलाशवृंतविभागः। अशीत्यर्द्धं शिरःस्थाने ग्रीवायां दश योजयेत्। उरसि
त्रिंशतं दद्याद्विंशतिं जठरे न्यसेत्। बाहुभ्यां तु शतं दद्याद्द्यादंगुलिषु दश। तत्तीयासप्तमपृष्ठे द्वादशार्द्धं द्व
त्रिंशतं दद्याद्विंशतिं जठरे न्यसेत्। ...
षणायोरर्धार्द्धं शिश्न एव तु। ऊरुभ्यां तु शतं दद्यात्त्रिंशतं जानुजंघयोः। पादांगुलीषु दश वा एतत्प्रेतेषु लक्ष
णामिति। तथा। नालिकेरं शिरःस्थाने तु वंदद्याच्च तालुके। पंचरत्नं मुखे दद्याज्जिह्वायां कदलीफलं। अ
त्रेषु तालकं दद्याद्वालकं घ्राण एव च। वसायां मृत्तिकां दद्यात्कौ मूत्रे रागं मूत्रकं॥ गंधकं धातवो देया हरि

तालं मनःशिला पारदं रेतसः स्थाने पुरीषे पित्तलं तथा। मनःशिला तथा गात्रे तिलकल्कं च संधिषु। यवपिष्टं तथा मां
से मधु शोणिते तु मेव च। केशेषु च जटाजूटं त्वचायां च मृगत्वचं। कर्णयोस्तालपत्रं च स्तनयोश्चैव गुंजिका। ना
सायां शतपत्रं च कमलं नाभिमंडले। वृंताकं वृषणे द्वंद्वे लिंगे स्याद्गर्जरं शुभं। घृतं नाभ्यां प्रदेयं स्यात्कौपी
नं च त्रपुः स्मृतं। मौक्तिकं स्तनयोर्मूर्ध्नि कुंकुमेन विलेपनं। कर्पूरागुरुधूपैश्च शुभ्रैर्माल्यैः सुगंधिभिः। परिधानं
पट्टसूत्रं हृदये रुक्मकं तथा। ऋद्धिवृद्धी उभे द्वे च चक्षुर्भ्यां च कपर्दिकौ। सिंदूरं नेत्रकोणेषु तांबूला घुप
हारकैः। सर्वौषधियुतं प्रेतं कृत्वा पूजां यथोदितां। साग्निकेचापि विधिना यज्ञपात्रं न्यसेत्क्रमात्। शिरोमध्ये श्रीः पु
नः तु मा इमं मे वरुणेति च। प्रेतस्य पावनं कृत्वा शालग्रामशिलाजलैः। विष्णुमुद्दिश्य दातव्या सुशीला गौः प
यस्विनी तिलालोहं हिरण्यं च कार्पासं लवणं तथा। सप्तधान्यं क्षितिर्गौश्च एकैकं पावनं स्मृतं। तिलपात्रं ततो द
द्याद्दानं तथैव च। ततो देवर्षी देयात्सर्वाभरणभूषिता। कर्तव्यं देशवंशाद्यं प्रेतमुद्दिश्य पर्यमात्मनि। प्रेतस्तत्र वै
मोक्षं ततः कुर्यात् द्विविष्णुप्रकल्पयेत्। ॐ विष्णुरिति संस्मृत्य प्रेतं तं स्पृशमेव च। अग्निदाहं ततः कुर्यात्सितकं च दि
नत्रयं। इत्थं प्रतिकृतिकरणानंतरं पात्रं प्रतिपत्तिविषये कात्यायनः। केशश्मश्रुलोमनखनि कृंतना निकृत्वा
विपुरीषे वेधछन्नकेशादी त्रिरवायसर्पिषा तरन्ना वितावेन मादयाति। कृष्णाजिनमास्तीर्य प्राक्शिरसं सप्र

शु॰म॰
१९

